Roll No. ........ ........

Total No. of Questions : 19

Total No. of Printed Pages : 8

# M-206

## High School, Examination (Regular) - 2021

## संस्कृत (सामान्यम्)

## SANSKRIT (GENERAL)

Time : 3 Hours ] [ Maximum Marks : 100

निर्देशा :

(i) सर्वे प्रश्नाः अनिवार्याः सन्ति ।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

1 उचितविकल्पं चित्वा लिखत – 1×5=5

(क) 'रमेशः' इत्यस्मिन् पदे सन्धिः अस्ति –

(अ) अयादि सन्धिः (ब) गुण सन्धिः

(स) यण् सन्धिः (द) वृद्धि सन्धिः

(ख) 'विद्यालयः' इत्यस्य पदस्य संधि विच्छेदः अस्ति –

(अ) विद्या + आलयः (ब) वि + आलयः

(स) विद्या + लयः (द) वि + द्यालयः

(ग) 'जगदीशः' इत्यस्मिन् पदे सन्धिः अस्ति –

(अ) व्यञ्जनसन्धिः (ब) स्वरसन्धिः

(स) विसर्गसन्धिः (द) पूर्वरुपसन्धिः

(घ) विसर्गसन्धेः उदाहरणम् अस्ति –

(अ) सुवन्तः (ब) पुरोहितः

(स) योगेशः (द) तच्छिवः

(ङ) 'सदाचारः एव परमो धर्मः' अस्मिन् वाक्ये अव्ययम् अस्ति –

(अ) सदाचारः (ब) एव

(स) परमो (द) धर्मः

2 उचितविकल्पं चित्वा लिखत 1×5=5

(क) 'पञ्चवटी' इत्यस्मिन् पदे समासः अस्ति

(अ) द्विगुसमासः (ब) द्वन्द्वसमासः

(स) कर्मधारयसमासः (द) बहुव्रीहिसमासः

(ख) 'ईश्वरभक्तः' अस्मिन् पदे समासः अस्ति –

(अ) अव्ययीभावसमासः (ब) द्वन्द्वसमासः

(स) तत्पुरुषसमासः (द) कर्मधारयसमासः

(ग) द्वन्द्वसमासस्य उदाहरणम् अस्ति –

(अ) हरिहरौ (ब) घनश्यामः

(स) अनुरूपम् (द) चन्द्रशेखरः

(घ) 'प्रतिध्वनिः' इत्यस्मिन् पदे उपसर्गः अस्ति –

(अ) ति (ब) प्रति

(स) ध्वनिः (द) नि

(ङ) अधोलिखितेषु पदेषु उपसर्गः अस्ति –

(अ) अधि (ब) अपि

(स) अति (द) असि

3 उचितविकल्पं चित्वा लिखत – 1×5=5

(क) 'अपश्यत्' अस्मिन् पदे लकारः अस्ति –

(अ) लट्लकारः (ब) लोट्लकारः

(स) लङ्लकारः (द) लृट्लकारः

(ख) 'याचते' इत्यस्मिन् पदे धातुः अस्ति –

(अ) याच् (ब) अच्

(स) ते (द) याचत्

(ग) 'भविष्यति' इत्यस्मिन् पदे वचनम् अस्ति –

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम् (द) अन्यवचनम्

(घ) 'गच्छामः' अस्मिन् पदे पुरुषः अस्ति –

(अ) प्रथमपुरुषः (ब) मध्यमपुरुषः

(स) उत्तमपुरुषः (द) सत्पुरुषः

(ङ) 'भवान् तु विद्वान् अस्ति' । अस्मिन् वाक्ये अव्ययम् अस्ति –

(अ) भवान् (ब) तु

(स) विद्वान् (द) अस्ति

4 उचितविकल्पं चित्वा लिखत – 1×5=5

(क) 'वर्धमानः' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) शतृ (ब) शानच्

(स) क्तवतु (द) मतुप्

(ख) 'क्त्वा' प्रत्ययस्य उदाहरणम् अस्ति –

(अ) नीत्वा (ब) नेतुम्

(स) गुरुत्वम् (द) ज्ञानिन्

(ग) 'शक्तिमान्' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) शानच् (ब) क्तवतु

(स) मतुप् (द) तुमुन्

(घ) 'कुमारी' इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) क्त (ब) ङीप्

(स) शतृ (द) इन्

(ङ) परसदननिविष्टः को ............... न याति ।

(अ) महत्वं (ब) प्रभुत्वं

(स) दैवत्वं (द) लघुत्वं

5 प्रदत्तैः शब्दैः रिक्त–स्थानपूर्तिं कुरूत – 1×5=5

(दैवतम्, मार्गायासं, श्रेष्ठः, स्मरन्तु, आत्मा)

(क) पथिकाः ........................ परिहरन्ति स्म ।

(ख) ज्येष्ठः ........................ कुले लोके ।

(ग) पुरातनं स्वपौरुषं ........................ वीरबन्धवः ।

(घ) सर्वेषु शरीरेषु ........................ एक एव ।

(ङ) माता किल मनुष्याणां देवतानां च ........................ ।

6 अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत – 3×2=6

(क) विदिशानगरी कस्य देशस्य राजधानी आसीत् ?

(ख) मानवजीवनस्य उन्नत्यै अतिमहत्त्वपूर्णं किं भवति ?

(ग) सिद्धार्थः अनुज्ञां प्राप्तुं कस्य समीपं गतः ?

(घ) सर्वप्राचीना भाषा का अस्ति ?

(ङ) सुतापेक्षी कः आसीत् ?

7 अधोलिखितेषु द्वयोः शब्दयोः शब्दरूपाणि निर्देशानुसारं लिखत – 2

(i) राम – चतुर्थीविभक्तिः एकवचनम्

(ii) पितृ – सप्तमीविभक्तिः बहुवचनम्

(iii) तत् (पुंल्लिङ्गे) – प्रथमाविभक्तिः बहुवचनम्

8 'साधुभिः' अथवा 'कवीनाम्' इत्यस्य पदस्य विभक्तिं वचनं च लिखत । 2

9 अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 5×2=10

(क) गङ्गातीरे मार्कण्डेयः नाम कश्चन् मुनिः वसति स्म । तस्य गुरुकुले बहवः शिष्याः आसन् । वासुदेवः तस्य प्रियशिष्यः । तस्य द्वादशवर्षात्मकम् अध्ययनं यदा समाप्तं तदा गुरुः तम् आहूय अवदत् – 'शिष्य ! अधुना भवान् सर्वविद्यापारङ्गतः अस्ति । अतः इतः परं स्वग्रामं गन्तुम् अर्हति भवान् । गमनात् पूर्वं भवता द्वारकापुरस्य देवराजस्य गृहं दृष्ट्वा आगन्तव्यम् । किन्तु गृहस्यान्तः न गन्तव्यम्' इति ।

(i) गङ्गातीरे कः वसति स्म ?

(ii) बहवः शिष्याः कुत्र आसन् ?

(iii) वासुदेवः कस्य प्रियशिष्यः आसीत् ?

(iv) गुरुः शिष्यम् आहूय कदा अवदत् ?

(v) सर्वविद्यापारङ्गतः कः अभवत् ?

(ख) 'प्रकृतिरपि समयस्य पालनं, कार्यपरायणताम् एव उपदिशति निरन्तरम्' । प्रकृतौ यावन्तः पदार्थाः सृष्टाः सन्ति ते सर्वेऽपि अहोरात्रं कार्यरतलग्ना एव दृश्यन्ते । सूर्य-चन्द्राभ्याम् आरभ्य कीट-पतङ्ग-पिपीलिका-पर्यन्तं सर्वेऽपि स्व-स्व व्यापारे व्यापृताः विलोक्यन्ते । अतः प्रकृत्या अपि इयमेव शिक्षा दीयते यत् नहि केनापि समयस्य अनुपयोगः कर्तव्यः इति ।

(i) प्रकृतिरपि किम् उपदिशति ?

(ii) सर्वेऽपि कस्मिन् व्यापृताः ?

(iii) कया समयस्य पालनमेव शिक्षा दीयते ?

(iv) कस्य अनुपयोगः न कर्त्तव्यः ?

(v) 'दृश्यन्ते' इति पदे कः धातुः अस्ति ?

(ग) वरूणदेवः वृष्टिं वर्षति । सूर्यदेवः प्रकाशं प्रयच्छति । भूमाता वृक्षस्य आधारभूता अस्ति । वायुः अनिलं ददाति । ते सर्वे वृक्षं पालयन्ति पोषयन्ति रक्षन्ति च । ते न कदापि 'मम अधिकारः वर्तते' इति अवदत् । ते सर्वे परोपकारिणः । पर यूयं सर्वे परोपकारिणः वृक्षस्य साहाय्यं स्वीकृत्य तमेव नाशयितुं कृतसङ्कल्पाः यूयं स्वाश्रयमेव नाशयथ । अस्मिन् वृक्षे छिन्ने सति यूयं कुत्र गमिष्यथ ?

(i) कः वृष्टिं वर्षति ?

(ii) सूर्यदेवः किं प्रयच्छति ?

(iii) का वृक्षस्य आधारभूता अस्ति ?

(iv) कः अनिलं ददाति ?

(v) के परोपकारिणः ?

10 अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 5×2=10

(क) दानेन भूतानि वशीभवन्ति
दानेन वैराण्यपि यान्ति नाशम् ।
परोऽपि बन्धुत्वमुपैति दानै–
र्दानं हि सर्वव्यसनानि हन्ति ॥

(i) भूतानि केन वशीभवन्ति ?

(ii) दानेन कानि नाशम् यान्ति ?

(iii) दानैः कः बन्धुत्वमुपैति ?

(iv) दानं कानि हन्ति ?

(v) 'भवन्ति' इत्यस्मिन् पदे का धातुः अस्ति ?

(ख) युवान एष वः परीक्षणस्य काल आगतः

हिमालयस्य रक्षणे समुद्यताः स्थ सर्वतः ।

अयं सखा पुरातनोऽस्य भारतस्य विद्यते ।

स्वकर्मणि प्रवर्तितुं कदापि नैव खिद्यते ॥

(i) युवान एष वः कस्य कालः आगतः ?

(ii) कस्य रक्षणे समुद्यताः स्थ सर्वतः ?

(iii) अयं पुरातनोऽस्य भारतस्य कः विद्यते ?

(iv) कस्मिन् प्रवर्तितुं कदापि नैव खिद्यते ?

(v) 'कदापि' इत्यस्य पदस्य सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत ।

(ग) मत्ता गजेन्द्रा मुदिता गवेन्द्रा

वनेषु विक्रान्ततरा मृगेन्द्राः ।

रम्या नगेन्द्रा निभृता नरेन्द्राः

प्रक्रीडितो वारिधरैः सुरेन्द्रः ॥

(i) मत्ताः के ?

(ii) गवेन्द्राः कीदृशाः भवन्ति ?

(iii) वनेषु विक्रान्ततराः के ?

(iv) के निभृताः सन्ति ?

(v) सुरेन्द्रः कैः सह प्रक्रीडितः ?

11 युग्ममेलनं कुरुत – (कोऽपि चत्वारः) 1×4=4

| (क) | (ख) |
|---|---|
| (i) वाग्भूषणम् | (क) अतिपातयेत् |
| (ii) कृषीवलैः | (ख) गर्विता |
| (iii) न कार्यकालम् | (ग) भूषणम् |
| (iv) आकाशगङ्गा | (घ) वाल्मीकिना |
| (v) आदिकविना | (ङ) धान्यवृद्धयः |

12 शुद्धवाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत – (कोऽपि चत्वारः) 1×4=4

(i) वृक्षाणां छेदनं महत् पापम् ।

(ii) मध्येमार्गं तेन रत्नपुरं प्राप्तम् ।

(iii) मानवशरीरं देवदुर्लभं नास्ति ।

(iv) महर्षेः ख्यातिः सर्वत्र व्याप्ता अस्ति ।

(v) धनेन अमृतत्वं प्राप्यते ।

13 अधोलिखितेषु प्रश्नेषु <u>चतुर्णां</u> प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन लिखत – 1×4=4

(i) कस्य ध्वनिः अन्तरिक्षम् अस्पृशत् ?

(ii) 'किमहमब्राह्मणः' इति कः उक्तवान् ?

(iii) महर्षिः कस्य स्थापनां कृतवान् ?

(iv) 'संस्कृतभाषा भारतीयभाषाभ्यः गङ्गानदी अस्ति' इति कः उक्तवान् ?

(v) सिद्धार्थः कस्य पुत्रः आसीत् ?

(vi) मैत्रेयी कस्य पत्नी आसीत् ?

(vii) 'बुन्देलकेसरी' इति नाम्ना कः प्रसिद्धः ?

14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत । 4

15 स्वप्राचार्यस्यकृते अवकाशार्थम् आवेदनपत्रं संस्कृतभाषायां लिखत । 4

**अथवा**

स्वमित्राय एकं शुभकामनापत्रं संस्कृतभाषायां लिखत ।

16 अधोलिखितेषु पञ्च अशुद्धकारक वाक्यानां शुद्धिं कुरूत – 1×5=5

(i) श्रीकृष्णं नमः ।

(ii) सर्वे बालकाः धावति ।

(iii) माता बालकं दुग्धं ददाति ।

(iv) भवान् कुत्र पश्यसि ?

(v) द्वौ–द्वौ चत्वारो भवन्ति ।

(vi) पिता पुत्रस्य सह आगतः ।

(vii) कृष्णं नवनीतं रोचते ।

17 अधोलिखित वाक्यानां कथानुसारेण क्रम–संयोजनं कुरुत – 1×5=5

(i) कुपितः मुनिः तान् सगरपुत्रान् क्रोधाग्निना दग्धवान्

(ii) तस्मिन् काले भूलोके गङ्गा न आसीत्

(iii) सूर्यवंशस्य राजा सगरः आसीत्

(iv) भगीरथः दुःखितः अभवत् ।

(v) तदा मुनिः तपः कुर्वन् ध्याने आसीत् ।

18 अधोलिखितम् अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 5

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी । जन्मभूमिः स्वर्गात् उत्कृष्टतरा अस्ति । सा लोकानां शरणदायिनी, विविधखाद्यपदार्थप्रदायिनी, सर्वव्यवहाराणां लीलाभूमिः च अस्ति । वैदिकः ऋषिः कथयति – माता भूमिः पुत्रोऽहं पृथिव्याः । वयं राष्ट्रियभावनां, राष्ट्रियचरित्रं, त्यागभावनां विना राष्ट्रस्य संरक्षणं कर्तुं न पारयामः । परस्परैक्यभावनां विना राष्ट्रं कदापि समृद्धं न भवति । अतः अस्माभिः स्वार्थं परित्यज्य देशस्य देशवासिनां च सेवा सततं करणीया ।

(i) जन्मभूमिः कस्मात् गरीयसी ?

(ii) 'माताभूमिः' इति कः कथयति ?

(iii) का लोकानां शरणदायिनी ?

(iv) कां विना राष्ट्रं कदापि समृद्धं न भवति ?

(v) 'स्वर्गात्' शब्दे का विभक्तिः अस्ति ?

19 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु अथवा दश वाक्येषु संस्कृतभाषायां निबन्धं लिखत – 10

(i) उत्सवः (दीपावलिः)

(ii) सदाचारः

(iii) संस्कृतभाषायाः महत्त्वम्

(iv) छात्रजीवनम्